कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ षष्ठ काण्डे द्वितीयः प्रश्नः॥

हरिः ओम्॥ यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्यज्ञं वि च्छिन्द्याद्यदुभावविमुच्य यथाऽनागतायाऽऽतिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान्भवत्यविमुक्तोऽन्योऽथातिथ्यङ्गृह्णाति यज्ञस्य संतत्यै पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवाऽनुमतं निर्वपति यद्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवै- [१] ष यज्ञस्याऽन्वारम्भोऽनवच्छित्त्यै यावद्धिर्वै राजाऽनुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दाग्ंसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति सोमस्याऽऽतिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथेरातिथ्यमसि विष्णवे त्वेत्याह जगत्या [२] एवैतेन करोत्यग्नये त्वा रायस्पोषदावन्ने विष्णवे त्वेत्याहानुष्टुभ एवैतेन करोति श्येनाय त्वा सोमभृते विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धे ब्रह्मवादिनो वदन्ति कस्माथ्सत्याद्गायत्रिया उभयत आतिथ्यस्य क्रियत इति यदेवाऽदस्सोममा- [३] ऽहरत्तस्माद्गायत्रिया उभयत आतिथ्यस्य क्रियते पुरस्ताच्चोपरिष्टाच्च शिरो वा एतद्यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो भवति तस्मान्नवधा शिरो विष्यूतं नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता स्तोमेन सं मितास्तेजस्त्रिवृत्तेज एव यज्ञस्य शीर्ष्न्दधाति नवकपालः पुरोडाशो भवति ते

त्रयस्त्रिकपालास्त्रिवृता प्राणेन संमितास्त्रिवृद्वै [४] प्राणस्त्रिवृतमेव प्राणमभिपूर्वं यज्ञस्य शीर्ष्नदधाति प्रजापतेर्वा एतानि पक्ष्माणि यदश्ववाला ऐक्षवी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः सम्भरति देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन्ते देवाः कार्ष्मर्यमपश्यन्कर्मण्यो वै कर्मैनेन कुर्वीतेति ते कार्ष्मर्यमयान्परिधीन– [५] कुर्वत तैर्वै ते रक्षाग्स्यपाऽघ्नत यत्कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै सग्ग् स्पर्शयति रक्षसामनन्ववचाराय न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन्पुरस्तादृक्षाग्स्यपहन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाग्स्यपहन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्त्य– [६] ग्निश्च वा एतौ सोमश्च कथा सोमायाऽऽतिथ्यङ्क्रियते नाऽग्नय इति यदग्नावग्निं मथित्वा प्रहरति तेनैवाऽग्नय आतिथ्यङ्क्रियतेऽथो खल्वाहुरग्निः सर्वा देवता इति यद्धविरासाद्याऽग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयति॥[७]

पत्निया एव जगत्या आ त्रिवृद्वै परिदीन् वदन्त्येकचत्वारिग्ंशच्च॥6.2.1॥

देवासुराः संयत्ता आसन्ते देवा मिथो विप्रिया आसन्ते २ ऽन्योऽन्यस्मै ज्यैष्ठ्यायाऽतिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेऽमन्यन्ताऽसुरेभ्यो वा इदम्भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो या न इमाः प्रियास्तनुवस्ताः समवद्यामहै ताभ्यः स निर्ऋच्छाद्यो [८] नः प्रथमोऽ(१)न्योऽन्यस्मै द्रुह्यादिति तस्माद्यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्छति यत्तानूनप्त्रग्ं समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो

भवति पञ्च कृत्वोऽवद्यति पञ्चधा हि ते तथ्समवाद्यन्ताऽथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्ध आपतये त्वा गृह्णामीत्याह प्राणो वा [९] आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवाद्यन्त शाक्वरायेत्याह शक्त्यै हि ते ताः समवाद्यन्त शक्मन्नोजिष्ठायेत्याहौजिष्ठग्ं हि ते तदात्मनः समवाद्यन्ताऽनाधृष्टमस्यनाधृष्यमित्याहाऽनाधृष्टग्ग् ह्येतदनाधृष्यं देवानामोज [१०] इत्याह देवानाग् ह्येतदोजोऽभिशस्तिपा अनभिशस्तेन्यमित्याहाऽभिशस्तिपा ह्येतदनभिशस्तेन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामित्याह यथायजुरेवैतद्घृतं वै देवा वज्रं कृत्वा सोममघ्नन्नन्तिकमिव खलु वा अस्यैतच्चरन्ति यत्तानूनप्त्रेण प्रचरन्त्यग्ंशुरग्ंशुस्ते देव सोमाऽऽ प्यायतामित्याह य- [११] देवाऽस्याऽपुवायते यन्मीयते तदेवास्यैतेनाऽऽ प्याययत्या तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेत्याहोभावेवेन्द्रं च सोमञ्चाऽऽ प्याययत्या प्याययं सखीन्थ्सन्या मेधयेत्याहर्त्विजो वा अस्य सखायस्तानेवाऽऽ प्याययति स्वस्ति ते देव सोम सुत्यामशीये- [१२] त्याऽऽहाशिषमेवैतामा शास्ते प्र वा एतेऽस्माल्लोकाच्च्यवन्ते ये सोममाप्याययन्त्यन्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रेषे भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिँल्लोके प्रति तिष्ठन्ति देवासुराः संयत्ता आसन्ते देवा बिभ्यतोऽग्निं प्राऽविशन्तस्मादाहुरग्निः सर्वा देवता इति ते- [१३] ऽग्निमेव वरूथं कृत्वाऽसुरानभ्यभवन्नग्निमिव खलु वा एष प्र विशति योऽवान्तरदीक्षामुपैति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यात्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया सन्तरां मेखलाग्ं समायच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो

भवति मदन्तीभिर्मार्जयते निर्ह्यग्निः शीतेन वायति समिद्ध्यै या ते अग्ने रुद्रिया तनूरित्याह स्वयैवैनद्देवतया व्रतयति सयोनित्वाय शान्त्यै॥[१४]

ये वा ओज आह यदशीयेति तेऽग्न एकादश च॥6.2.2॥

तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमाऽथ रजताऽथ हरिणी ता देवा जेतुन्नाऽशक्नुवन्ता उपसदैवाऽजिगीषन्तस्मादाहुर्यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति त इषुगुं समस्कुर्वताऽग्निमनीकगुं सोमगुं शल्यं विष्णुं तेजनन्तेऽब्रुवन्क इमामसिष्यतीति [१५] रुद्र इत्यब्रुवन्रुद्रो वै क्रूरः सोऽस्यत्विति सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिस्तागुं रुद्रोऽवाऽसृजथ्स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान्प्राऽणुदत यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्त्यै नाऽन्यामाहुतिं पुरस्ताज्जुहुयाद्यदन्यामाहुतिं पुरस्ताज्जुहुया- [१६] दन्यन्मुखं कुर्याथ्स्रुवेणाऽऽघारमा घारयति यज्ञस्य प्रज्ञात्यैपराङतिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान्प्रऽणुदते पुनरत्याक्रम्योपसदं जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्याञ्जित्वा भ्रातृव्यलोकमभ्यारोहति देवा वै याः प्रातरुपसद उपासीदन्नह्नस्ताभिरसुरान्प्राणुदन्त याः सायगुं रात्रियै ताभिर्यथ्सायं प्रातरुपसद [१७] उपसद्यन्तेऽहोरात्राभ्यामेव तद्यजमानो भ्रातृव्यान्प्र णुदते याः प्रातर्याज्याः स्युस्ताः सायं पुरोऽनुवाक्याः कुर्यादयातयामत्वाय तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान्प्रीणाति षट्थ्सं पद्यन्ते षड्वा ऋतव ऋ तूनेव प्रीणाति द्वादशाऽहीने सोम उपैति द्वादश मासाः संवथ्सरः संवथ्सरमेव प्रीणाति चतुर्विग्ंशतिः सं [१८] पद्यन्ते चतुर्विग्ंशतिरर्धमासा अर्धमासानेव प्रीणात्यारागग्रामवान्तरदीक्षामुपेयाद्यः

कामयेताऽस्मिन्मे लोकेऽर्धुकग्ग् स्यादित्येकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा आराग्राऽवान्तरदीक्षाऽस्मिन्नेवाऽस्मै लोकेऽर्धुकं भवति परोवरीयसीमवान्तरदीक्षामुपेयाद्यः कामयेतामुष्मिन्मे लोकेऽर्धुकग्ग् स्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षामुष्मिन्नेवाऽस्मै लोकेऽर्धुकम्भवति॥[१९]

असिष्यतीति जुहुयाथ्सायंप्रातरुपसदश्चतुर्विग्ंशतिस्सञ्चतुरोऽग्ने षोडस च॥6.2.3॥

सुवर्गं वा एते लोकं यन्ति य उपसद उपयन्ति तेषां य उन्नयते हीयत एव स नोदनेषीति सून्नीयमिव यो वै स्वार्थेतां यताग् श्रान्तो हीयत उत स निष्ट्याय सह वसति तस्माथ्सकृदुन्नीय नाऽपरमुन्नयेत दध्नोन्नयेतैतद्वै पशूनाग्ं रूपग्ं रूपेणैव पशूनव रुन्धे [२०] यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा स पृथिवीं प्राऽविशत्तं देवा हस्तान्थ्सग्ंरभ्यैच्छन्तमिन्द्र उपर्युपर्यत्यक्रामथ्सोऽब्रवीत्को माऽयमुपर्युपर्यत्यक्रमीदित्यहं दुर्गे हन्तेत्यथ कस्त्वमित्यहं दुर्गादाहर्तेति सोऽब्रवीद्दुर्गे वै हन्ताऽवोचथा वराहोऽयं वाममोषः [२१] सप्तानाङ्गिरीणां परस्ताद्वित्तं वेद्यमसुराणाम्बिभर्ति तं जहि यदि दुर्गे हन्ताऽसीति स दर्भपुञ्जीलमुद्बृह्य सप्त गिरीन्भित्त्वा तमहन्थ्सोऽब्रवीद्दुर्गाद्वा आहर्ताऽवोचथा एतमा हरेति तमेभ्यो यज्ञ एव यज्ञमाऽहरद्यत्तद्वित्तं वेद्यमसुराणामविन्दन्त तदेकं वेद्यै वेदित्वमसुराणां [२२] वा इयमग्र आसीद्यावदासीनः परापश्यति तावद्देवानां ते देवा अब्रुवन्नस्त्वेव नोऽस्यामपीति कियद्वो दास्याम इति यावदियग्ं सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इन्द्रः सलावृकी रूपं कृत्वेमां त्रिः सर्वतः पर्यक्रामत्तदिमामविन्दन्त

यदिमामविन्दन्त तद्वेद्यै वेदित्वग्ं [२३] सा वा इयग्ं सर्वैव वेदिरियति शक्ष्यामीति त्वा अवमायय जन्ते त्रिग्ंशत्पदानि पश्चात्तिरश्ची भवति षट्त्रिग्ंशत्प्राची चतुर्विग्ंशतिः पुरस्तात्तिरश्ची दशदश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्ध उद्धन्ति यदेवाऽस्या अमेध्यं तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति बर्हिः स्तृणाति तस्मादोषधयः पुनरा भवन्त्युत्तरम्बर्हिष उत्तरबर्हिः स्तृणाति प्रजा वै बर्हिर्यजमान उत्तरबर्हिर्यजमानमेवाऽयजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरः॥[२४]

*रुन्धे वाममोषो वेदित्वमसुराणां वेदित्वं भवन्ति पञ्चविग्ंशतिश्च॥**6.2.4***॥

यद्वा अनीशानो भारमादत्ते वि वै स लिशते यद्द्वादश साह्नस्योपसदः स्युस्तिस्रोऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साह्नस्योपसदो द्वादशाऽहीनस्य यज्ञस्य सवीर्यत्वायाऽथो सलोम क्रियते वथ्सस्यैकः स्तनो भागी हि सोऽथैकग्ग् स्तनं व्रतमुपैत्यथ द्वावथ त्रीनथ चतुर एतद्वै [२५] क्षुरपवि नाम व्रतं येन प्र जातान्भ्रातृव्यान्नुदते प्रति जनिष्यमाणानथो कनीयसैव भूय उपैति चतुरोऽग्रे स्तनान्व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद्वै सुजघनं नाम व्रतं तपस्यग्ं सुवर्ग्यमथो प्रैव जायते प्रजया पशुभिर्यवागू राजन्यस्य व्रतं क्रूरेव वै यवागूः क्रूर इव [२६] राजन्यो वज्रस्य रूपग्ं समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पुष्ट्यै पयो ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पयस्तेजसैव तेजः पय आत्मन्धत्तेऽथो पयसा वै गर्भा वर्धन्ते गर्भ इव खलु वा एष यद्दीक्षितो यदस्य पयो व्रतम्भवत्यात्मानमेव तद्वर्धयति त्रिव्रतो वै मनुरासीद्द्विव्रता असुरा एकव्रता [२७] देवाः प्रातर्मध्यन्दिने

सायं तन्मनोव्रतमासीत्पाकयज्ञस्य रूपं पुष्ट्यै प्रातश्च सायं चाऽसुराणां निर्मध्यं क्षुधो रूपं ततस्ते पराऽभवन्मध्यन्दिने मध्यरात्रे देवानां ततस्तेऽभवन्थ्सुवर्गं लोकमायन्यदस्य मध्यन्दिने मध्यरात्रे व्रतम्भवति मध्यतो वा अन्नेन भुञ्जते मध्यत एव तदूर्जं धत्ते भ्रातृव्याभिभूत्यै भवत्यात्मना [२८] पराऽस्य भ्रातृव्यो भवति गर्भो वा एष यद्दीक्षितो योनिर्दीक्षितविमितं यद्दीक्षितो दीक्षितविमितात्प्रवसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथायैष वै व्याघ्रः कुलगोपो यदऽग्निस्तस्माद्यद्दीक्षितः प्रवसेथ्स एनमीश्वरोऽनूत्थाय हन्तोर्न प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शय एतद्वै यजमानस्याऽऽयतनग्ग् स्व एवाऽऽयतने शयेऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शये॥[२९]

*एतद्वै क्रूर इवैकव्रता आत्मना यजमानस्य त्रयोदश च॥**6.2.5**॥*

पुरोहविषि देवयजने याजयेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदित्येतद्वै पुरोहविर्देवयजनं यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि विपश्यत्युपैनमुत्तरो यज्ञो नमत्यभि सुवर्गं लोकं जयत्याप्ते देवयजने याजयेद्भ्रातृव्यवन्तं पन्थां वाऽधिस्पर्शयेत्कर्तं वा यावन्नानसे यातवै [३०] न रथायैतद्वा आप्तं देवयजनमाप्नोत्येव भ्रातृव्यं नैनम्भ्रातृव्य आप्नोत्येकोन्नते देवयजने याजयेत्पशुकाममेकोन्नताद्वै देवयजनादङ्गिरसः पशूनसृजन्ताऽन्तरा सदोहविर्धाने उन्नतग्ग् स्यादेतद्वा एकोन्नतं देवयजनं पशुमानेव भवति त्र्युन्नते देवयजने याजयेथ्सुवर्गकामं त्र्युन्नताद्वै देवयजनादङ्गिरसः सुवर्गं लोकमायन्नन्तराऽहवनीयञ्च हविर्धानञ्चो- [३१] न्नतग्ग् स्यादन्तरा हविर्धानं च सदश्चाऽन्तरा सदश्च गार्हपत्यं

चैतद्वै न्युन्नतं देवयजनग्ं सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने याजयेत्प्रतिष्ठाकाममेतद्वै प्रतिष्ठितं देवयजनं यथ्सर्वतः समं प्रत्येव तिष्ठति यत्राऽन्याअन्या ओषधयो व्यतिषक्ताः स्युस्तद्याजयेत्पशुकाममेतद्वै पशूनाग्ं रूपग्ं रूपेणैवाऽस्मै पशू- [३२] नव रुन्धे पशुमानेव भवति निर्ऋतिगृहीते देवयजने याजयेद्यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमित्येतद्वै निर्ऋतिगृहीतं देवयजनं यथ्सदृश्यै सत्या ऋक्षं निर्ऋत्यैवास्य यज्ञं ग्राहयति व्यावृत्ते देवयजने याजयेद्व्यावृत्कामं यं पात्रे वा तल्पे वा मीमाग्ंसेरन्प्राचीनमाहवनीयात्प्रवणग्ग् स्यात्प्रतीचीनं गार्हपत्यादेतद्वै व्यावृत्तं देवयजनं वि पाप्मना भ्रातृव्येणाऽऽ वर्तते नैनं पात्रे न तल्पे मीमाग्ंसन्ते कार्ये देवयजने याजयेद्भूतिकामं कार्यो वै पुरुषो भवत्येव॥[३३]

यातवै हविर्धानञ्च पशून्पाप्मनाऽष्टादश च||**6.2.6**||

तेभ्य उत्तरवेदिः सिग्ंही रूपं कृत्वोभयानन्तराऽपक्रम्यातिष्ठत्ते देवा अमन्यन्त यतरान् वा इयमुपावथ्स्यति त इदम्भविष्यन्तीति तामुपाऽमन्त्रयन्त साऽब्रवीद्वरं वृणै सर्वान्मया कामान्व्यश्नवथ पूर्वान्तु माऽग्नेराहुतिरश्नवता इति तस्मादुत्तरवेदिं पूर्वामग्नेर्व्याघारयन्ति वारेवृतग्ग् ह्यस्यै शम्यया परि मिमीते [३४] मात्रैवाऽस्यै साऽथो युक्तेनैव युक्तमव रुन्धे वित्तायनी मेऽसीत्याह वित्ता ह्येनानावत्तिक्तायनी मे ऽसीत्याह तिक्तान् ह्येनानावदवतान्मा नाथितमित्याह नाथितान् ह्येनानावदवतान्मा व्यथितमित्याह व्यथितान् ह्येनानावद्विदेरग्निर्नभो नामा- [३५] ऽग्ने अङ्गिर इति त्रिर्हरति य एवैषु लोकेष्वग्नयस्तानेवाऽव रुन्धे तूष्णीं चतुर्थग्ं हरत्यनिरुक्तमेवाऽव रुन्धे सि

महिषीरसीत्याह सिग्ंहीर्ह्येषा रूपं कृत्वोभयानन्तराऽपक्रम्याऽतिष्ठदुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमानमेव प्रजया पशुभिः प्रथयति ध्रुवा- [३६] ऽसीति सग्ं हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेत्यव चोक्षति प्र च किरति शुद्ध्या इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वित्याह दिग्भ्य एवैनां प्रोक्षति देवाग्श्चेदुत्तरवेदिरुपाववर्तीहैव वि जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त तानिन्द्रघोषो वसुभिः पुरस्तादपा- [३७] ऽनुदत मनोजवाः पितृभिर्दक्षिणतः प्रचेता रुद्रैः पश्चाद्विश्वकर्माऽऽदित्यैरुत्तरतो यदेवमुत्तरवेदिं प्रोक्षति दिग्भ्य एव तद्यजमानो भ्रातृव्यान्प्रणुदत इन्द्रो यतीन्थ्सालावृकेभ्यः प्राऽयच्छत्तान्दक्षिणत उत्तरवेद्या आदन् यत्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरं तत्तेन शमयति यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति॥[३८]

मिमीते नाम ध्रुवाऽप शुचा त्रीणि च||**6.2.7**||

सोत्तरवेदिरब्रवीथ्सर्वान्मया कामान्व्यश्नवथेति ते देवा अकामयन्ताऽसुरान्भ्रातृव्यानभि भवेमेति तेऽजुहवुः सिग्ंहीरसि सपत्नसाही स्वाहेति तेऽसुरान्भ्रातृव्यानभ्यभवन्तेऽसुरान्भ्रातृव्यानभिभूयाऽकामयन्त प्रजां विन्देमहीति तेऽजुहवुः सिग्ंहीरसि सुप्रजावनिः स्वाहेति ते प्रजामविन्दन्त ते प्रजां वित्त्वा- [३९] ऽकामयन्त पशून् विन्देमहीति तेऽजुहवुः सिग्ंहीरसि रायस्पोषवनिः स्वाहेति ते पशूनविन्दन्त ते पशून् वित्त्वाकामयन्त प्रतिष्ठां विन्देमहीति तेऽजुहवुः सिग्ंहीरस्यादित्यवनिः स्वाहेति त इमां प्रतिष्ठामविन्दन्त त इमां प्रतिष्ठां वित्त्वाकामयन्त देवता आशिष उपेयामेति तेऽजुहवुः सिग्ंहीरस्या वह देवान्देवयते

[४०] यजमानाय स्वाहेति ते देवता आशिष उपाऽऽयन्पञ्च कृत्वो व्याघारयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्भागधेयं तानेव तेन प्रीणाति पौतुद्रवान्परिधीन्परि दधात्येषां [४१] लोकानां विधृत्या अग्नेस्त्रयो ज्यायाग्ंसो भ्रातर आसन्ते देवेभ्यो हव्यं वहन्तः प्राऽमीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमाऽरिष्यतीति स निलायत स यां वनस्पतिष्ववसत्तां पूतुद्रौ यामोषधीषु ताग्ं सुगन्धितेजने यां पशुषु तां पेत्वस्याऽन्तरा शृङ्गे तं देवताः प्रैषमैच्छन्तमन्वविन्दन्तमब्रुव- [४२] न्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याऽहुतस्य बहिःपरिधि स्कन्दात्तन्मे भ्रातृणाम्भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति सोऽमन्यताऽस्थन्वन्तो मे पूर्वे भ्रातरः प्राऽमेषताऽस्थानि शातया इति स यान्य- [४३] स्थान्यशातयत तत्पूतुद्रुभवद्यन्माग्ंसमुपमृतं तदुल्गुलु यदेतान्थ्सम्भारान्थ्सम्भरत्यग्निमेव तथ्सम्भरत्यग्नेः पुरीषमसीत्याहाऽग्नेर्ह्येतत्पुरीषं यथ्संभारा अथो खल्वाहुरेते वावैनं ते भ्रातरः परि शेरे यत्पौतुद्रवाः परिधय इति॥[४४]

वित्वा देवयत एषामब्रुवन् यानि चतुश्चत्वारिग्ंशच्च॥6.2.8॥

बद्धमव स्यति वरुणपाशादेवैने मुञ्चति प्र णेनेक्ति मेध्य एवैने करोति सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुभयतो बद्धो यदक्षः स यदुथ्सर्जेद्यजमानस्य गृहानभ्युथ्सर्जेथ्सुवाग्देव दुर्याग्ं

आ वदेत्याह गृहा वै दुर्याः शान्त्यै पल्यु- [४५] पानक्ति पत्नी हि सर्वस्य मित्रं मित्रत्वाय यद्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवैष यज्ञस्याऽन्वारम्भोऽनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञगं् रक्षागं्सि जिघागं्सन्ति वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति यज्ञो वै विष्णुर्यज्ञादेव रक्षाग्स्यप हन्ति यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षागं्सि यज्ञगं् हन्युर्- [४६] हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञगं् रक्षागं्सि घ्नन्ति प्राची प्रेतमध्वरं कल्पयन्ती इत्याह सुवर्गमेवैने लोकं गमयत्यत्र रमेथां वर्ष्मन्पृथिव्या इत्याह वर्ष्म ह्येतत्पृथिव्या यद्देवयजनगं् शिरो वा एतद्यज्ञस्य यद्धविर्धानं दिवो वा विष्णवुत वा पृथिव्या [४७] इत्याशीर्पदयर्चा दक्षिणस्य हविर्धानस्य मेथीं नि हन्ति शीर्षत एव यज्ञस्य यजमान आशिषोऽव रुन्धे दण्डो वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाऽक्षमच्छिनद्यत्तृतीयं छदिर्हविर्धानयोरुदाह्रियते तृतीयस्य हविर्धानस्याऽवरुद्ध्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानं विष्णो रराटमसि विष्णोः पृष्ठमसीत्याह तस्मादेतावद्धा शिरो विष्यूतं विष्णोः स्यूरसि विष्णोर्ध्रुवमसीत्याह वैष्णवग्ं हि देवतया हविर्धानं यं प्रथमं ग्रन्थिं ग्रथ्नीयात्यत्तं न विस्रग्ंसयेदमेहेनाध्वर्युः प्र मीयेत तस्माथ्स विस्रस्यः॥[४८]

पत्नी हन्युर्वा पृथिव्या विष्यूतं विष्णोषड्विगग्ंशतिश्च॥6.2.9॥

देवस्य त्वा सवितुः प्रसव इत्यश्विमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाऽश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै वज्र इव वा एषा यदभ्रिरभ्रिरसि नारिरसीत्याह शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञगं् रक्षागं्सि जिघागं्सन्ति

परिलिखितग्ं रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या [४९] इदमहग्ं रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवाऽनन्तरायं ग्रीवाः कृन्तति दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेत्याहैभ्य एवैनां लोकेभ्यः प्रोक्षति परस्तादर्वाचीं प्रोक्षति तस्मात्- [५०] परस्तादर्वाचीं मनुष्या ऊर्जमुप जीवन्ति क्रूरमिव वा एतत्करोति यत्खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुम्बर ऊर्जैवोर्जग्ं समर्धयति यजमानेन सं मितौदुम्बरी भवति यावानेव यजमानस्तावतीमेवाऽस्मिन्नूर्जं दधाति पितृणाग्ं सदनमसीति बर्हिरव स्तृणाति पितृदेवत्य २ग्ग् [५१] ह्येतद्यन्निखातं यद्बर्हिरनवस्तीर्य मिनुयात्पितृदेवत्या निखाता स्याद्बर्हिरवस्तीर्य मिनोत्यस्यामेवैनां मिनोत्यथो स्वारुहमेवैनां करोत्युद्दिवग्ग् स्तभानाऽऽन्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै द्युतानस्त्वा मारुतो मिनोत्वित्याह द्युतानो ह स्म वै मारुतो देवानामौदुम्बरीं मिनोति तेनैवै- [५२] नां मिनोति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतद्धृतेन द्यावापृथिवी आ पृणेथामित्यौदुम्बर्यां जुहोति द्यावापृथिवी एव रसेनाऽनक्त्यान्तमन्ववस्रावयत्यान्तमेव यजमानं तेजसाऽनक्त्यैन्द्रमसीति छदिरधि नि दधात्यैन्द्रग्ं हि देवतया सदो विश्वजनस्य छायेत्याह विश्वजनस्य ह्येषा छाया यथ्सदो नवछदि [५३] तेजस्कामस्य मिनुयात्त्रिवृता स्तोमेन संमितं तेजस्त्रिवृत्तेजस्व्येव भवत्येकादशच्छदीन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशछदि भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशछदि प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविग्ंशतिछदि प्रतिष्ठाकामस्यैकविग्ंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या उदरं वै सद ऊर्गुदुम्बरो मध्यत

औदुम्बरीं मिनोति मध्यत एव प्रजानामूर्जं दधाति तस्मा- [५४] न्मध्यत ऊर्जा भुञ्जते यजमानलोके वै दक्षिणानि छदीग्ंषि भ्रातृव्यलोक उत्तराणि दक्षिणान्युत्तराणि करोति यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्वर्तान्करोति व्यावृत्त्यै तस्मादरण्यं प्रजा उप जीवन्ति परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैतदिन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहैन्द्रग्ं हि देवतया सदो यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्रग्ंसयेदमेहेनाऽध्वर्युः प्र मीयेत तस्माथ्स विस्रस्यः॥[५५]

*अपहत्यै तस्मात्पितृदेवत्यन्तेनैव नवछदि तस्माथ्सदः पञ्चदश च॥**6.2.10**॥*

शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा हविर्धाने खायन्ते तस्माच्छीर्ष्णन्प्राणा अधस्तात्खायन्ते तस्मादधस्ताच्छीर्ष्णः प्राणा रक्षोहणो वलगहनो वैष्णवान्खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानां प्राणेषु वलगान्न्यखनन्तान्बाहुमात्रेऽन्वविन्दन्तस्माद्बाहुमात्राः खायन्त इदमहं तं वलगमुद्वपामि [५६] यन्नः समानो यमसमानो निचखानेत्याह द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्वपति सं तृणत्ति तस्माथ्संतृण्णा अन्तरतः प्राणा न सम्भिनत्ति तस्मादसम्भिन्नाः प्राणा अपोऽव नयति तस्मादार्द्रा अन्तरतः प्राणा यवमतीरव नय- [५७] त्यूग्र्वैयवः प्राणा उपरवाः प्राणेष्वेवोर्जं दधाति बर्हिरव स्तृणाति तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघारयति तेजो वा आज्यं प्राणा उपरवाः प्राणेष्वेव तेजो दधाति हनू वा एते यज्ञस्य यदधिषवणे न सं तृणत्त्य संतृण्णे हि हनू अथो खलु दीर्घसोमे संतृद्ये धृत्यै शिरो वा एतद्यज्ञस्य

यद्धविर्धानं [५८] प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता मुखमाहवनीयो नासिकोत्तरवेदिरुदरग्ं सदो यदा खलु वै जिह्वया दथ्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्धाने चर्मन्नधि ग्रावभिरभिषुत्याऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह एवैनामियं वै विराट्तस्यै त्वक्चर्मोधोऽधिषवणे स्तना उपरवा ग्रावाणो वथ्सा ऋत्विजो दुहन्ति सोमः पयो य एवं वेद दुह एवैनाम्॥[५९]

*वपामि यवमतीरव नयति हविर्धानमेव त्रयोविग्ंशतिश्च॥**6.2.11***॥

*यदुभौ देवासुरा मिथस्तेषाग्ं सुवर्गं यद्वा अनीशानः पुरोहविषि तेभ्यस्सोत्तरवेदिर्बधन्देवस्याऽग्निं वज्रश्शिरो वा एकादश॥**11***॥

यदुभावित्याह देवानां यज्ञो देवेभ्यो न रथाय यजमानाय परस्तादर्वाचीन्नवपञ्चाशत्॥५९॥

यदुभौ दुह एवैनाम्॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति षष्ठ काण्डे द्वितीयः प्रश्नः॥